In Public domain. Digitization Muthulakshmi Research Academy

- ☐ उपोद्घातः (परिमलसहिताया महार्थमञ्जर्याः)
- ☐ सात्वतीयं दर्शनम्
- ☐ शक्तिसंगमतन्त्रविषये किञ्चित्
- ☐ शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति
- ☐ महामाया कुण्डलिनी
- ☐ सात्वतीयो योगः
- ☐ तान्त्रिकी वरिवस्या तस्या भेदाश्च
- ☐ शाक्तेषु तन्त्रेषु शक्तितत्त्वम्
- ☐ शक्तिसंगमतन्त्रे शाङ्करदर्शनामिसम्प्रदायः
- ☐ पुराणवर्णिताः पाशुपता योगाचार्याः
- ☐ पुराणानां नूनमागममूलकत्वम्
- ☐ क्रमदर्शनस्यैव नूनं मुख्यं शाक्तत्वम्
- ☐ आगमीयं दर्शनम्
- ☐ तन्त्रशास्त्राणां सामयिक उपयोगः
- ☐ देवो भूत्वा यजेद् देवान्
- ☐ प्रायश्च सिद्धान्तप्रियो लोकः
- ☐ आचार्यशङ्करीयः प्रपञ्चसारः
- ☐ प्रास्ताविकम् (षड्दर्शनसूत्रसंग्रहस्य)

उपोद्घातः

[परिमलसहिताया महार्थमञ्जर्याः]

वाराणसेयसंस्कृतविश्वविद्यालये योगतन्त्रविभागस्थापनानुकालं १९६४-६५ ई० वर्षतः प्रवृत्तमनुसन्धानप्रकाशनादिकार्यम्। स्वनामधन्यानामागमाब्धिपारेदृश्वनां प्रातःस्मरणीयानां श्रद्धेयचरणानां श्रीमतां म० म० पण्डितगोपीनाथकविराजमहोदयानामाध्यक्ष्ये प्रवृत्तेन योगतन्त्रविभागेन कार्यक्रमः कोऽपि सुविचारितः प्राचाल्यत तदर्थम्। षट्खण्डात्मक आसीत् स कार्यक्रमः। तदित्थम्—

(१) लुप्तप्रायाणामप्रकाशितानामथ च दुर्लभानां योगतन्त्रग्रन्थानां प्रकाशनम्। अत्र वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनाख्यः पुस्तकालयः प्रधानमवलम्बनम्। तत्र संगृहीताभिस्तन्त्रागमवाङ्मयस्य मातृकाभिः पाठसंशोधनादिपुरस्सरं सज्जीक्रियन्ते ग्रन्था मुद्रणाय, प्रकाश्यन्ते च ते तन्त्रसंग्रहनाम्ना। अधुनावधि तन्त्रसंग्रहस्य प्रत्येकं षड्ग्रन्थात्मकं भागद्वयं मुद्रितं प्रकाशितं च, यत्र हि प्रथमे भागे सटीका विरूपाक्षपञ्चाशिका, क्षेमराजव्याख्योपेता साम्बपञ्चाशिका, नित्यानन्दविरचितव्याख्योपेतं त्रिपुरामहिम्नस्तोत्रम्, उत्पलवैष्णवविरचिता स्पन्दप्रदीपिका, अनुभवसूत्रम्, वातुलशुद्धाख्यतन्त्रं च प्रकाशितानि। द्वितीये च भागे समावेशितानि निर्वाण-तोडल-कामधेनु-फेत्कारिणी-ज्ञानसंकलिनीतन्त्राणि पूर्वं बंगलिपिमुद्रितानि, कन्नडलिपिमुद्रितो देवीकालोत्तरागमश्च निरञ्जनसिद्धविरचितया वृत्त्या ग्रन्थलिप्यां मुद्रितपूर्वया समलङ्कृतः। ख्यातिमाप च नित्याषोढशिकार्णवनामा ग्रन्थः शिवानन्दविरचितया ऋजुविमर्शिन्या विद्यानन्दविरचितयाऽर्थरत्नावल्या च व्याख्यया समलङ्कृत उत्तरप्रदेशीयेन प्रशासनेन साम्प्रतमेव कालिदासपुरस्कारेण संमानितः। अत्र च परिशिष्टे दीपकनाथविरचितं त्रिपुरसुन्दरीदण्डकम्, शिवानन्दमुनिविरचितानि सुभगोदय-सुभगोदयवासना-सौभाग्यहृदयस्तोत्राणि अमृतानन्दयोगिविरचितौ सौभाग्यसुधोदय-चिद्विलासस्तवौ च समावेशितानि।

(२) ऐतिहासिक्या आध्यात्मिक्या च दृष्ट्या योगतन्त्रविषयाणां समालोचनम्। एतदर्थं प्रवृत्ता योगतन्त्रविमर्शिनीनाम्नी विभागास्यास्यानुसन्धानपत्रिकाऽनियतकालिकी। अस्याः प्रथमोऽङ्कः साम्प्रतं प्रकाशितः, यत्र हि एकादश

In Public domain. Digitization Muthulakshmi Research Academy

निबन्धाः सन्निवेशिताः। १९६५ ई० वर्षे वाराणसेयसंस्कृतविश्वविद्यालये सम्पन्ने तन्त्रसम्मेलने विभिन्नासु गोष्ठीषु पठितेषु निबन्धेषु कतिपये संस्कृतभाषामया हिन्दीभाषामयाश्च निबन्धा अद्याप्यप्रकाशिता अवशिष्यन्ते। तन्त्रसम्मेलनाव-सरेऽत्रैव समायोजितायां तन्त्रप्रदर्शिन्यां भूयांसि विशिष्टानि दर्शनार्हाणि वस्तूनि तान्त्रिकसंस्कृतिसम्बद्धानि चित्राणि च प्रदर्शितानि। तेषामपि परिचय ऐतिह्यासिक्या सांस्कृतिक्या च दृष्ट्या तन्त्रशास्त्रानुशीलनरुचीनां विदुषां परोपकारकर इति कृत्वा योगतन्त्रविमर्शिन्या विशेषाङ्कः प्रकाशयिषितः सत्यार्थिके सौविध्ये।

(३) समुपलभ्यन्ते भूयांसि वचांसि ग्रन्थग्रन्थकारनामोल्लेखपुरस्सरमुद्धृतानि तन्त्रागममूलग्रन्थेषु टीकाग्रन्थेषु च, येषां मूलग्रन्था न दृश्यन्ते केषुचिदपि पुस्तकालयेषु। एतादृशानां वचनानां संग्रहः क्रियते लघ्वागमसंग्रहनाम्ना। अस्य प्रथमो भागः प्रकाशितः, यत्र प्रायः २२१ संख्यापरिमितानां ग्रन्थानां ग्रन्थकाराणां च वचनानि संकलितानि। सज्जीक्रियते द्वितीयो भाग मुद्रणाय। अचिरादेव प्रकाशयिष्यते सोऽपि, यत्रोभयोरपि भागयोः सन्निवेशिता ग्रन्था ग्रन्थकाराश्च तान्त्रिकवाङ्मयस्यावान्तरविभागवर्गीकरणमुखेन ऐतिह्यासिक्या दार्शनिक्या च दृष्ट्या पर्यालोचयिष्यन्ते।

(४) तान्त्रिकं दर्शनं वर्तते साम्प्रतं विरलप्रचारम्। अस्यापि वर्तते स्वकीया पारिभाषिकी शब्दावली। अपरिज्ञाय तदर्थं प्रवेशो दुर्लभस्तत्रेति तान्त्रिकदर्शनदुर्गमकान्तारे निर्भयं प्रवेशाय जिज्ञासूनां तान्त्रिकग्रन्थानां विशेषतष्टीकाग्रन्थानां साहाय्येन संगृह्यते पारिभाषिकशब्दानामर्थः, तन्त्रकोश-नाम्ना च प्रकाशयिष्यते सोऽपि, यत्रोभयोरपि भागयोः सन्निवेशिता ग्रन्था ग्रन्थकाराश्च तान्त्रिकवाङ्मयस्यावान्तरविभागवर्गीकरणमुखेन ऐतिहासिक्या दार्शनिक्या च दृष्ट्या पर्यालोचयिष्यन्ते।

(५) तान्त्रिके वाङ्मये समुपलभ्यते सकामानां प्रयोगाणां निरूपको भागस्तत्र तत्र प्रासङ्गिकेन रूपेण प्रामुख्येन वा प्रदर्शितः। यद्यपि नास्ति तेषा-माध्यात्मिक उपयोगस्तद्दृष्ट्या हेयाश्च ते समुद्घोष्यन्ते, तथापि वर्तते लोककल्याणाय तेषामुपयोग इति प्रयोगप्रतिपादकानामीदृशानामंशानां संग्रहोऽपि कर्तव्यताकोटिमाटीकतेऽस्य विभागस्य।

(६) विभिन्नासु तान्त्रिकीषूपासनापद्धतिषु विभिन्नानां देवतानां च ध्यानोपासनारहस्यसूचका अंशा यथायथं समुपलभ्यन्ते। अत्र ध्यानमुखेन तासां तासां देवतानां सकलं स्वरूपमुन्मील्यते। आधुनिकमूर्तिविद्यायां नूतनदृगुन्मेषाय वर्तते कोऽपि तस्यांशस्योपयोग इति तदर्थमपि प्रयत्यते विभागेनानेन।

समेषामेषां कार्यकलापानां विशेषतो दुर्लभानामप्रकाशितानामथ च लिप्यन्तरेषु मुद्रितानाम्, मुद्रितपूर्वाणामपि साम्प्रतं सुदुर्लभानां च तन्त्रशास्त्र-ग्रन्थानां प्रकाशनाय प्रक्रान्ता नाम योगतन्त्रग्रन्थमाला। अस्याः पञ्चममुष्पल्पेण महार्थमञ्जर्याः परिमलोपेताया महेश्वरानन्दकृतेः १९१९ ई० वर्षे त्रिवेन्द्र-संस्कृतग्रन्थमालायां प्रकाशितपूर्वायां अपि साम्प्रतं सुदुर्लभाया अभिनव परिष्कृतमिदं संस्करणं तन्त्रशास्त्ररसिकानां विदुषां समक्षमुपस्थापितवतामस्माकं मोमुद्यते चेतः।

किं नाम योगतन्त्रम्?

योगतन्त्रविभागः, योगतन्त्रग्रन्थमाला, योगतन्त्रविमर्शिनीत्यादिषु प्रयुक्तो योगतन्त्रशब्दः काञ्चन व्याख्यामपेक्षते। साम्प्रतं शिक्षणसंस्थासु पाठ्यक्रमे सन्निवेशितं योगशास्त्रं केवलं पातञ्जलयोगस्यैव बोधकम्। एतदतिरिक्तं विभिन्ना यौगिकाः सम्प्रदायाः प्रवृत्ता आसन् भारते वर्षे। साम्प्रतमपि च केचनानुवृत्ताः, अपरे च हन्त! नामशेषतां गताः। मोहेंजोदड़ो-हड़प्पास्थानयोः समुपलब्धेषु सिन्धुसभ्यतावशेषेषु भारते प्राचीनतमे काले वर्तमानाया विशिष्टाया यौगिकपद्धतेश्चिह्नानि समवलोक्यन्ते। श्वेताद्दिलकुलीशान्तानामष्टाविंशति-संख्याकानां योगाचार्याणां प्रत्येकं चत्वारः शिष्या इति कृत्वा चत्वारिंशदुत्तरशतं पाशुपता योगिनो पुराणेषु गीयन्ते। त्रिपिटकान्तर्गते पालिवाङ्मये विशेषतः परवर्तिषु विशुद्धिमार्ग-अभिधर्मार्थसंग्रहप्रभृतिपालिग्रन्थेषु यौगिकानि विशिष्टानि रहस्यानि वर्ण्यन्ते। दृश्यते तान्त्रिकः षडङ्गो योगः शैवेषु वैष्णवेषु बौद्धेषु च तन्त्रेषु समानतन्त्रत्वेन व्याख्यातः। वर्तते मत्स्येन्द्रनाथावतारितः कौलिको योगविधिः पिण्ड-पद-रूप-रूपातीतपदैर्जनयोगाचार्यैरपि समं व्याख्यातः, कुण्ड-लिनीयोगश्च बौद्धवज्रयानविद्वद्भिरपि शून्यवादविज्ञानवादमुखेनोपन्यस्तः। प्रचलिता च विद्यते नेतिधौतिप्रभृतिषट्कर्मप्रतिपादनपरा गोरक्षप्रभृतीनां नाथयोगिनां विशिष्टा योगपद्धतिः। एतासामेव यौगिकदृष्टीनां शाखाप्रशाखा भारते वर्षे विभिन्नेषु स्थानेषु सहज-अवधूत-बाउल-मञ्जसखि-सन्त-सिक्ख-दरवेश-प्रभृतिनामभिः प्रचलिता विद्यन्ते। सर्वास्ता दृष्टीः क्रोडीकृत्य प्रवर्ततेऽत्रत्यो योगशब्दः।

आगमशास्त्रमिति तन्त्रशास्त्रमिति वा नाम्ना प्रथितं वर्तते भारतीयं विशालं वाङ्मयम्, साम्प्रतमपि प्रायो विद्वद्गोष्ठीषु नातिसत्कृतम्। रहस्या-म्नायपदेन प्रख्यापितं तत्। शैवानां वैष्णवानां च तदीयं वाङ्मयमागमपदेन, शाक्तानां बौद्धानां जैनानां च तन्त्रपदेन प्रायोऽभिधीयते। तिष्ठत्स्वपि साधक-

In Public domain. Digitization Muthulakshmi Research Academy

वर्येषु तत्र तत्र साधनानिरतेषु लुप्तप्रायमेवासीदेतच्छास्त्रं पठनपाठनविधिषु सर्वथा बहिष्कृतम्। विस्मृतप्राया एवासन्नत्रत्या विशिष्टा ग्रन्था अपि। कश्मीर-महाराजश्रीप्रतापसिंहदेवप्रतिष्ठापितया काश्मीरग्रन्थमालया, दक्षिणभारतीय-संस्थाभिर्नैकाभिः, पाण्डिचेरीस्थफ्रेंचशोधसंस्थानेन, तिरुपतिस्थवेङ्कटेश्वरशोध-संस्थानेन, बड़ोदानगरस्थगायकवाड़शोधसंस्थानेन, कलिकातास्थितयाऽऽगमा-नुसन्धानसमित्या च काश्मीरशैवागमस्य, सिद्धान्तवीरशैवागमयोः, षाञ्चरात्र-वैखानसवैष्णवागमयोः, बौद्धानां शाक्तानां च तन्त्राणां विशिष्टा ग्रन्थाः प्राका-श्यन्त। कलिकाता-उच्चन्यायालयस्य विचारपतिना मनीषिणा सरजानवुडरफ-महानुभावेन शिवचन्द्रविद्यार्णवस्य शिष्येण 'आर्थर एवेलन' इति कल्पितेन नाम्ना विशिष्टान् तन्त्रग्रन्थान् प्रकाश्य आङ्गलभाषया व्याख्याय च पुनः प्रतिष्ठा-मापादितमेतच्छास्त्रम्। डॉ० विनयतोषभट्टाचार्य-डॉ० प्रबोधचन्द्रबागची-डॉ० कान्तिचन्द्रपाण्डेय-डॉ० चिन्ताहरणचक्रवर्ति-डॉ० गोविन्दगोपालमुखोपाध्याय-डॉ० उपेन्द्रनाथदासप्रभृतयो भारतीयाः, प्राध्यापकसिलवांलेबो-डॉ० ओटोश्राडर-प्रा० बर्नेट-टुची-न्योली-गुन्थर-प्रभृतयो वैदेशिकाश्च विद्वांसः प्रायतन् प्रवृत्ताश्च सन्ति शास्त्रस्यास्य गौरववर्धनाय। तदेतच्छाखाप्रशाखासहितं विशालं वाङ्मयं तन्त्रपदाभिधेयम्।

एवं च योगतन्त्रपदेनानेन योगशास्त्रस्य तन्त्रशास्त्रस्य च सर्वाः शाखा-प्रशाखास्तदीयं विशालं वाङ्मयं प्रकाशितमप्रकाशितं विस्मृतं लुप्तं च बोध्यते। उपर्युल्लिखितानां संस्थानां विदुषां च प्रयत्नेन तदेतस्य शास्त्रस्य कियानेवांशः प्राकाश्यत। नेपाल–कश्मीर–दक्षिणभारतादिषु स्थितं विशालं तान्त्रिकं वाङ्मय-मधुनापि प्रकाशनानुशीलनसापेक्षमिति कृत्वा तदेतस्य पुण्यकर्मणः साधनायो-त्तरप्रदेशस्य भूतपूर्वराज्यपालमहोदयेन महामहिमश्रीविश्वनाथदासमहानुभावेन संस्कृतविश्वविद्यालयस्य कुलपतिना, उपकुलपतिना च भूतपूर्वेण श्रीमता सुरतिनारायणमणित्रिपाठिमहाभागेन विश्वविद्यालयानुदानायोगस्यार्थिकेन साहाय्येन तन्त्रशास्त्रोद्धारैकजीवनव्रतानां म० म० पण्डितगोपीनाथकविराज-महोदयानामाध्यक्ष्ये प्रवर्तित एष योगतन्त्रविभागोऽधुनावधि किमकरोदिति पूर्वमेवावर्णयाम।

परिमलोपेता महार्थमञ्जरी

स्वोपज्ञपरिमलाख्यव्याख्योपेताया महार्थमञ्जर्या महेश्वरानन्दकृतेः साम्प्रतं दृश्यते संस्करणद्वयम्। एकं विस्तृतं त्रिवेन्द्रंसंस्कृतग्रन्थमालायां प्रकाशितम्, अपरं च संक्षिप्तं काश्मीरग्रन्थमालायां कृतपदम्। बाहुल्येन

समुपलभ्यन्ते संक्षिप्तस्यैव संस्करणस्य मातृकाः। भाण्डारकरशोधसंस्थाने स्थिता-स्तिस्रोऽपि मातृकाः संक्षिप्तस्यैव संस्करणस्य विद्यन्ते। उपलब्धा अप्येता मातृका नातीवोपयोगिन्य आसन् संस्करणेऽस्मिन्। सन्ति तिस्रो मातृका विस्तृतस्य संस्करणस्य अड्यारपुस्तकालये, एका च वर्तते होशियारपुरस्थिते विश्वेश्वरानन्द-वैदिकशोधसंस्थानपुस्तकालये। मलयालमलिपिलिखिताः सर्वा एता मातृका नहि मूलरूपेण नैव च प्रतिलिपिरूपेणोपलब्धा अद्यावधि योगतन्त्रविभागेन। दक्षिणभारतयात्राप्रसङ्गे, राजस्थानपंजाबयात्राप्रसङ्गे च गत्वाऽपि तत्र तत्र लिप्यनभिज्ञानवशादसुलभतया च वाचकस्यान्यस्य नैतासामुपयोगः कर्तुमपार्यत। सुदुर्लभं चासीद् विस्तृतं संस्करणमेतदिति श्रद्धेयचरणानां योगतन्त्रविभागस्य पूर्वाध्यक्षाणां म० म० श्रीगोपीनाथकविराजमहोदयानामाज्ञया प्रक्रान्तं मुद्रण-कार्यमेतस्य ग्रन्थस्य। कविराजमहोदयैरधीतस्य ग्रन्थस्य, कैश्चिद्विपश्चिद्भिरैः कृत-संशोधनस्य वाराणसीस्थगोयनकापुस्तकालयग्रन्थस्य च साहाय्येन संशोधिताऽस्य ग्रन्थस्य पाण्डुलिपिरुद्धृतानां ग्रन्थानां स्थलनिर्देशप्रसङ्गेन पुनरपि कृतसंशोधना साम्प्रतमभिनवेन रूपेण परिशिष्टभूमिकादिभिः संयोज्य समुपस्थाप्यते। समुप-लब्धेषु क्रमदर्शनग्रन्थेषु सर्वश्रेष्ठः सर्वाङ्गपूर्णश्चायं ग्रन्थः सर्वानेव क्रमदर्शनविषयान् क्रोडीकरोति। विषयोपस्थापनप्रसङ्गेन प्रमाणरूपेणोपन्यस्ताः शताधिका विशिष्टा ग्रन्था अत्र। एतादृशा अन्ये चोत्पलवैष्णवकृतस्पन्दप्रदीपिका-जयरथकृततन्त्रा-लोकविवेकप्रभृतयोऽल्पीयांस एव ग्रन्थाः सन्ति तान्त्रिके वाङ्मये, यत्र समुद्धृता भूयांसो ग्रन्थाः साम्प्रतं नामशेषतां गताः। एतद्विधानां ग्रन्थानां साहाय्येन लुप्तानामागमग्रन्थानां तत्कर्तॄणां च वचनानि संगृह्य गुरुचरणैः प्रकाशितो लुप्ताममसंग्रहस्य प्रथमो भागः। तत्पथानुवर्तिनस्तदाज्ञानुवर्तिनो वयमपि तस्य द्वितीयं भागं प्रचिकाशयिषामः। द्वितीयभागोपोद्घाते वयमुद्धृतानां ग्रन्थग्रन्थ-काराणां तत्प्रतिपादितविषयाणां चैतिहासिकं सांस्कृतिकं दार्शनिकं च महत्त्वं चिख्यापयिषाम इति साम्प्रतं विरमामस्तद्व्यापारात्। ग्रन्थकारस्य तु परिचय उन्मीलितपूर्वोऽन्यत्र पुनरत्रोन्मील्यते भङ्ग्यन्तरेण।

महेश्वरानन्दस्तत्कृतयश्च

महेश्वरानन्दमधिकृत्य वयं नित्याषोडशिकार्णवोपोद्घाते ऋजुविमर्शिनी-कारशिवानन्दपरिचयप्रसङ्गेन (पृ० १७–१९) किमप्यवोचाम। तेनेदं सिद्ध्यति यदृजुविमर्शिनीकारः शिवानन्दो महेश्वरानन्दपरमगुरुः[1], चोलदेशशिरोमणिर्महा-

१. महेश्वरानन्देन परमगुरुकृतित्वेनोद्धृतानां ग्रन्थानां परिचयो नित्याषोडशिकार्णवो-पोद्घाते (पृ० १७-१९) प्रदत्तः।

In Public domain. Digitization Muthulakshmi Research Academy

प्रकाशश्चास्य गुरुः[1]। महाराष्ट्रभुवा प्राकृतभाषया महार्थमञ्जरीं जग्रन्थ सः। चोलजनपदाभिजनो महेश्वरानन्दः पूर्वं गोरक्षनाम्ना प्रसिद्धिमाप, दीक्षोत्तरं च गुरुप्रदत्तयाऽभिनवयाऽनया संज्ञया प्रचकासेति। सर्वमेतन्महार्थमञ्जरीपरिमलप्रामाण्येनावदामेति तत्प्रपञ्चोऽत्रानावश्यकः। महार्थमञ्जरीकारो गोरक्षापरनामधेयो महेश्वरानन्द एष नवनाथेष्वन्यतमाद् गोरक्षनाथादभिन्न इति, एष च मत्स्येन्द्रनाथस्य सकलकुलशास्त्रावतारकस्य शिष्य इति विद्वद्गोष्ठीषु बहुचर्चितो विषयो नास्मभ्यं रोचत इति च वयं नित्याषोडशिकार्णवटिप्पण्योः (पृ० १७, ११६-११७) सप्रमाणं प्रत्यपादयाम। किञ्च, योगतन्त्रविमर्शिन्याः प्रथमेऽङ्के स्वकीये निबन्धे (पृ० १५९–१६०) ऋजुविमर्शिनीकारस्य शिवानन्दस्य समयः खीष्टत्रयोदशतमशताब्द्या अन्तिमो भागः, योगिनीहृदयदीपिकाकारस्य योगिनोऽमृतानन्दस्य समयः खीष्टचतुर्दशतमशताब्द्या अन्तिमो भागः, उभयोरनयोर्मध्ये च महार्थमञ्जरीकारस्य महेश्वरानन्दस्य स्थितिरिति वयं प्रमाणपुरस्सरमसाधयाम। अधिकं तु किञ्चिदत्रोच्यते।

यैर्विद्वद्भिर्गोरक्षनाथो मत्स्येन्द्रनाथशिष्यत्वेन साध्यते, तैरेवाभिनवगुप्तप्रामाण्येन मत्स्येन्द्रनाथस्य समयो नवमी दशमी वा शताब्दी खीष्टस्य निर्धार्यते। अभिनवगुप्तस्य खलु शिष्यः क्षेमराजोऽनेकान् तन्त्रग्रन्थान्, शिवसूत्राणि, साम्बपञ्चाशच्च व्याख्यातवान्, जग्रन्थ च सव्याख्यं प्रत्यभिज्ञासूत्रं प्रत्यभिज्ञाहृदयाख्यम्। सोऽयं क्षेमराजः सादरं स्मृतो महेश्वरानन्दस्य परमगुरुणा शिवानन्देन ऋजुविमर्शिन्याम् (पृ० २२९)। अत्रैव शिवानन्दः क्षेमराजकृतस्य स्पन्दनिर्णयस्य शिवसूत्रविमर्शिन्याश्च भाषामानुपूर्व्या छायया वाऽनुसरति। एवं चाभिनवगुप्तेन मच्छन्दविभुरित्येवं सादरं स्मृतस्य मत्स्येन्द्रनाथस्य कथं नामाभिनवगुप्तशिष्यस्य क्षेमराजस्य ग्रन्थानुद्धर्तुः शिवानन्दस्य प्रशिष्यो महेश्वरानन्दो गोरक्षापरनामधेयः शिष्यः स्यादिति विभावयन्तु मनीषिणः। न चायं कुत्रापि मत्स्येन्द्रनाथं स्वगुरुत्वेन स्मरति। महार्थमञ्जर्यां परिमले वा प्रतिपादितैः सिद्धान्तैरपि गोरक्षनाथस्य हठयोगिनो नाथसम्प्रदायप्रवर्तकस्य सिद्धान्तानां नैव किमपि साम्यमवलोक्यत इत्युभयोः पार्थक्यमेवाङ्गीकर्तव्यम्। किञ्च, शिवानन्द ऋजुविमर्शिन्यां (पृ० २२५) सोमशम्भुकृतकर्मकाण्डक्रमावलीवचनमुद्धरति। सोमशम्भुना चायं ग्रन्थः ११३० तमे वैक्रमे वत्सरे (१०७३ ई०) पूरितः। अपि

१. गुरोर्महाप्रकाशस्येमे ग्रन्थाः परिमले स्मृताः—१. मनोनुशासनस्तोत्रम्, २. मातङ्गीस्तोत्रम्, ३. संवित्स्तोत्रम्, ४. आनन्दताण्डवविलासस्तोत्रं चेति। एतेषु संवित्स्तोत्रमेकत्र (पृ० ६८) गुरुकृतित्वेन, अपरत्र (पृ० १२४) च परमगुरुकृतित्वेन स्मृतम्।

च, ऋजुविमर्शिन्यामेव शिवानन्दो द्वित्रेषु स्थलेषु नागभट्टं तद्ग्रन्थस्य त्रिपुरासारसमुच्चयस्य वचनं च समुद्धरति। नागभट्टश्चायं जैनसम्प्रदाये प्रसिद्धादनेकनाटककर्तुर्हस्तिमल्लादभिन्नः प्रायः खीष्टत्रयोदशतमशताब्दया अन्तिमे भागे लब्धस्थितिक इति समसाधि योगतन्त्रविमर्शिन्यां तत्रैव (पृ० १५७)। एवं च महेश्वरानन्दो न कथमपि भवितुमर्हति नाथसम्प्रदायप्रवर्तको गोरक्षनाथः। गोरक्षनाथोऽपि नैव भवति साक्षाच्छिष्यो मत्स्येन्द्रनाथस्य, न च प्रातिनिध्यमाचरति मत्स्येन्द्रसिद्धान्तानामित्यन्यत्र विस्तरेण प्रतिपादयिष्यते। तस्मादुपर्यूद्धृतैः प्रमाणैर्गोरक्षनाथाद् भिन्न एवायं महेश्वरानन्दः, तस्य च स्थितिकालः खीष्टचतुर्दशशताब्द्यां कस्मिंश्चित् समयेऽङ्गीकर्तव्यः।

महेश्वरानन्दः सप्ततिसंख्याकप्राकृतगाथामयीं महार्थमञ्जरीं जग्रन्थ। शिवानन्दमुनिविरचिते सुभगोदये सुभगोदयवासनायां सुभगोदयप्रभायां च, शिवानन्दपौत्रचिदानन्दपुत्रश्रीकण्ठानन्दविरचितायां निष्कलक्रमचर्चायां चापि सप्ततिसंख्याका एव श्लोकाः सन्ति। रहस्यात्मकस्यास्य शास्त्रस्यैतदपि रहस्यमेव। महार्थमञ्जरीकारः स्वयमेवात्र स्वोपज्ञां प्रतिभासारसर्वस्वां विस्तृतां परिमलाख्यां व्याख्यां ख्यापयामास। अत्रैव तेन कुण्डलाभरणम्, कोमलवल्लीस्तवः, नखप्रलापः, परास्तोत्रम्, पादुकोदयः, महार्थोदयः, संविदुल्लास इत्येते ग्रन्थाः स्वकृतित्वेनोल्लिखिताः। एषु कुण्डलाभरणनखप्रलापौ केवलं नामोल्लेखमात्रेण स्मर्येते, अन्येषां ग्रन्थानां वचनान्यप्यत्र दृश्यन्ते। अत्र ५७ तमे पृष्ठे "अत्र चेदमीयमेव सूक्तम्" इत्युक्त्वोद्धृतः "अश्वेषु गच्छत्सु" इत्यादिकः श्लोकस्तु सुभाषितरूपेणैव प्रकीर्णकतया लिखितः स्यात्, न तु सूक्तनामा कोऽपि ग्रन्थः। सूक्तशब्दोऽत्र शोभनोक्तिपर्यायः प्रतिभाति।

परिमलोद्धृता ग्रन्था ग्रन्थकाराश्च

लुप्तागमसंग्रहस्य द्वितीयभागोपोद्घातेऽत्रोद्धृता ग्रन्थग्रन्थकाराः परीक्षिष्यन्ते विस्तरेणेत्यनुपदमेवोक्तम्। यद्वर्तते प्रस्तुतसंस्करणोपयोगि तत्तु संक्षेपेणात्र समुपस्थाप्यते उद्धरणस्थलगवेषणाप्रसङ्गेनोन्मीलितम्। अत्रोद्धृता भूयांसो ग्रन्था नैवोपलभ्यन्ते मुद्रिता हस्तलिखिता वा। एतादृशां ग्रन्थानां वचनानि केवलं ग्रन्थग्रन्थकारनिर्देशमुखेनैव स्थापितान्युद्धृतवचनश्लोकार्धानुक्रमण्याम्। यानि वचनानि विनैव ग्रन्थग्रन्थकारनामनिर्देशमुद्धृतानि, तान्यपि लुप्तागमसंग्रहप्रथमद्वितीयभागसाहाय्येन तथा कृतानि। कानिचन वचनानि च साम्प्रतमप्यपेक्षन्ते ग्रन्थग्रन्थकारनामनिर्देशम्। अर्चनात्रिंशिकामातृकाद्वयं लक्ष्मणपुरस्थसंस्कृतपरिषत्पुस्तकालये समुपलभ्यते। "बालिकारचित" (पृ० १०८) इत्यादिक-

In Public domain. Digitization Muthulakshmi Research Academy

मत्रोद्धृतं पद्यं द्वितीयश्लोकत्वेन तत्र दृश्यते। एवमेव "सच्चित्सुखमयः" (पृ० ३४) इत्यादिकः श्लोकार्धः पादसूत्रमातृकायामज्यारपुस्तकालयस्थायां ६२१०३ संख्याङ्कितायां दृश्यते। आनन्दवर्धनाचार्यस्य ध्वन्यालोकः काव्यालोकपदेन, शिवानन्दस्य सुभगोदयवासना च क्रमवासनापदेनात्रोक्ता। नरेश्वरविवेकः सद्योज्योतिषा विरचिताद् नरेश्वरपरीक्षानाम्नो ग्रन्थाद्भिन्न एव।[1] तन्त्रालोकनाम्नोद्धृतमुद्धरणद्वयं [2]स्वच्छन्दनाम्नोद्धृतं पङ्क्तित्रयं च नोपलब्धमस्माभिस्तन्त्रालोके स्वच्छन्दतन्त्रे च। प्रबोधपञ्चदशिका काश्मीरग्रन्थमालायां प्रकाशिताया अभिनवगुप्तकृतेर्बोधपञ्चदशिकाया भिन्ना। मदालसोक्तिनाम्नोद्धृतः श्लोको मार्कण्डेयपुराणे योगिन्या मदालसाया उपाख्याने दृश्यते। महानयप्रकाशस्य संस्करणद्वयं प्रकाशितम्। एकं काश्मीरग्रन्थमालायां प्रकाशितं प्राकृतगाथामयम्, अपरं च त्रिवेन्द्रंसंस्कृग्रन्थमालायां प्रकाशितं संस्कृतभाषया निबद्धम्। परिमलोद्धृतानि महानयप्रकाशस्यानेकानि वचनानि त्रिवेन्द्रंसंस्करणे समुपलभ्यन्ते, नोपलब्धानि च कानिचन। ग्रन्थोऽयमपूर्ण एव प्रकाशितः। संभाव्यतेऽनुपलब्धाः श्लोकास्तदंशीया एव स्युः। विज्ञानभैरव इति ग्रन्थनाम, विज्ञानभट्टारकश्च ग्रन्थकर्तुः संज्ञा। शम्भवैक्यदीपिका शाम्भवदीपिका, ज्ञानेन्दुकौमुदी विज्ञानेन्दुकौमुदी इत्येते अभिन्ने नामनी प्रतीयेते। शिवानन्दविरचिता शम्भुनिर्णयदीपिकैव शम्भवैक्यदीपिका शाम्भवदीपिका वा स्यादित्युद्धरणानां स्वरूपावलोकनमुखेन प्रतीयते। मतेशापरनामधेयस्य षड्विंशावच्छेदात्मकस्य शम्भुनिर्णयस्य व्याख्यायाः शम्भुनिर्णयदीपिकायाः शिवानन्दमुनिविरचिताया मातृका मद्रपुरीराजकीयपुस्तकालये खण्डिताऽपूर्णा चोपलभ्यते। स्तोत्रभट्टारकस्य द्विविधान्युद्धरणान्यत्र दृश्यन्ते—अनुष्टुप्छन्दोमयानि, उपजातिवृत्तग्रथितानि च। सिद्धनाथविरचितस्य क्रमस्तोत्रस्य द्वादशकालीस्वरूपावबोधकाः श्लोका उपजातिवृत्तनिबद्धा जयरथेन तन्त्रालोकविवेके समुद्धृताः। अत्राभिनवगुप्तः क्रमकेलिनाम्नीं व्याख्यां जग्रन्थेति तत एव ज्ञायते। परिमले चानुष्टुप्छन्दोमयानां स्तोत्रभट्टारकश्लोकानामपि क्रमकेलिसाहचर्यं स्तोत्रभट्टारक इति क्रमस्तोत्रस्यैव संमानसूचकं नामेति ज्ञापयति। "एताश्च सृष्टिकाल्यादिव्यपदेशेन स्तोत्रभट्टारकादावुद्घाट्यन्ते" (पृ० १०१) परिमलोक्त्याऽनयापि तदेव सूच्यते। किञ्च, परिमलस्थः "कौलार्णवानन्दमयोर्मिरूपाम्"

१. "एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता" (पृ० ६५), "गुरुहृदयनिविष्टः शङ्करोऽनुग्रहीता" (पृ० १६९) इति च। अत्रत्यं प्रथममुद्धरणं तन्त्रालोकविवेके (४।४६) समुद्धृतं वर्तते।

२. "मुक्तानां शिवताव्यक्ति" इत्यादि "ते सर्वे वन्दना अपि" (पृ० ७०) इत्यन्तम्।

(पृ० १२६) इति स्तोत्रभट्टारकश्लोकांशस्तन्त्रालोकविवेके क्रमस्तोत्रश्लोकत्वेनोद्धृत इति क्रमस्तोत्रमेवैतत् स्तोत्रभट्टारक इति निश्चप्रचम्। अत एवास्माभिरत्र "तद्विवर्त" (पृ० १५०) इत्यादिकः श्लोकार्धः स्तोत्रभट्टारकश्लोकत्वेनाङ्कितः। अभिनवगुप्तविरचितः परमार्थसारोऽत्र परमार्थसंग्रह इति, परमार्थसारसंग्रह इति च नाम्ना स्मृतः, तत्तन्नाम्नोद्धृतानां सर्वेषां श्लोकानामेकत्रोपलम्भात्। क्रमवासनानाम्नोद्धृताः सर्वे श्लोकाः सुभगोदयवासनायां नित्याषोडशिकार्णपरिशिष्टे प्रकाशितायामुपलभ्यन्त इति सुभगोदयवासनैवात्र क्रमवासनापदेन स्मृतेति सूच्यते। शिवानन्देन यथा सुभगोदयस्तथैव महेश्वरानन्देन महार्थोदयो रचित इति "तत्तद्देवतामन्त्रोद्धारो मदीये महार्थोदये पर्यालोचनीयः" (पृ० १०४) इति तदुक्त्यैव प्रतीयते। मुद्रितायां तन्त्रवटधानिकायाम्—"षट्त्रिंशत्तत्त्वपर्यायः" (पृ० ६७) इति परिमलोद्धृतपाठस्य स्थाने—"विद्यातत्त्वादाशिवान्तम्" (३।१६) इति पाठो वर्तते। ईश्वरसिद्धौ च मुद्रितायां द्वितीयश्लोकस्योत्तरार्धः खण्डितो दृश्यते, परिमलसाहाय्येन तु "घटवद् यदनेवं तन्नैवं खपरमाणुवत्" (पृ० १७) तदेवं पूर्यते। "अख्यातिर्यदि" (पृ० १५) इत्यादिकं पद्यं क्षेमराजेन प्रत्यभिज्ञाहृदयचतुर्थसूत्रव्याख्यायां "तदुक्तं मयैव" इत्युक्त्वोद्धृतमिति तस्यैवैतत्। "नमः प्रमातृवपुषे" (पृ० ६१) इति श्लोकार्धो योगिनीहृदयदीपिकायां (पृ० २९३) "सर्वसंविन्नदीभेदभिन्नविश्रान्तिभूमये" इति पूर्वार्धपूर्तिपुरस्सरं परापञ्चाशिकावचनत्वेनोद्धृतो नोपलभ्यते मुद्रितायां तस्याम्। [1]महानयप्रकाशे, भावोपहारे (पृ० ४४) च श्लोकोऽयं प्रत्यभिज्ञाकारकृतित्वेनोल्लिखितः। "यत्रेन्धनम्" (पृ० १०९) इत्यादिकः श्लोकः परमार्थसारविवृतौ (पृ १४६) वीरवामनककृतित्वेनोट्टङ्कित इति तथैवात्र श्लोकानुक्रमण्यां स्थाप्यते।

महार्थमञ्जरीप्रतिपाद्यस्य क्रमदर्शनस्येतिहासः

महेश्वरानन्दो महार्थमञ्जर्यां परिमले च महार्थ-औत्तराम्नाय-अनुत्तराम्नाय-क्रमसरणिप्रभृतिपदाभिधेयं क्रमदर्शनं व्याख्यातवान्। क्रमदर्शनमेतत् प्राधान्येन त्रिकदर्शनमनुसरतीति स्वयमेवाह सः—"श्रीमहार्थत्रिकदर्शनयोर्नात्यन्तं भेदप्रथा" (पृ० ९२) इति। कौलदर्शनतोऽप्यस्य नैव वैलक्षण्यमित्यप्युक्तं तेनैव—"अस्यामर्थस्थितिः सैव या सर्वत्र कुलागमे। किन्तु शब्दस्य शय्यान्या नात्यन्तं सा विभिद्यते॥" (पृ० १९२) इति। मतदर्शनं यद्यपि नात्र चर्चितम्, तथापि महेश्वरानन्दस्य परमगुरुः शिवानन्दो मतेशापरनामधेयं शम्भुनिर्णयं व्याख्याति। मतशास्त्र-मतोत्तरप्रभृतयो ग्रन्थाश्चोद्धृता दृश्यन्ते तत्र तत्र।

१. काश्मीरसंस्करणम्, पृ. १२.

In Public domain. Digitization Muthulakshmi Research Academy

"वेदाच्छैवं ततो दक्षं ततो वामं ततः कुलम्। ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥" (पृ० ९२) इति परात्रीशिकाव्याख्यायामभिनवगुप्तोद्धृते वचनेऽस्मिन् कुलत्रिकयोरन्तरालवर्ति दृश्यते मतदर्शनम्। एवं च क्रम-मत-कुल-त्रिकदर्शनानामन्योन्यं नात्यन्तं भेदप्रथा, उपासनाविधिषु परं भेद इति वयं भणामः। अत्र मतोपासनाविधिस्वरूपं साम्प्रतं ग्रन्थानामनुपलम्भान्नैव स्पष्टीकर्तुं शक्यते, संभाव्यते कुब्जिकामत-मतशास्त्र-मतोत्तर-मतेशादिग्रन्थानां प्रकाशने सति तदधिगतं स्यात्। दक्षिणस्रोतःप्रवृत्तेषु चतुष्षष्टिसंख्याकेषु भैरवागमेषु देवो भैरवो वक्तृरूपेण, देवी च हिमगिरितनया श्रोतृरूपेण समुपस्थाप्येते। एवमेव दृश्यते कुलागमेष्वपि। औत्तराम्नायपदाभिधेयेषु क्रमशास्त्रेषु तु भगवती काली वक्तृरूपेण, शिवभट्टारकश्च श्रोतृरूपेणोपस्थापितौ। क्रम-सद्भावादिशास्त्रोद्धरणेषु तदवलोकयितुं शक्यते। भैरवागमा दक्षनय इति, औत्तरागमा देव्यागमा ऊर्ध्वाम्नायपदाभिधेयाः कुलागमाश्च वामनय इत्याख्यया परिचीयन्ते। साम्प्रतिकौ दक्षिणाचार-वामाचारशब्दौ यमर्थं स्फोरयतः, नहि तत्रार्थे तदात्वे प्रयुक्तावेतौ शब्दौ। केवलमेतयोर्दक्षिणवाममुखोद्गतत्वप्रयुक्तो भेदस्तदाऽवर्तत। पूजोपादानेषु तु नात्यन्तं भेदप्रथेति तत्तच्छास्त्रावलोकनतः प्रतीयते। त्रिकदर्शनं च [1]सिद्धान्तनाम्ना कदाचित्प्रसिद्धस्य शैवागमस्य क्रमकुल-दर्शनयोश्च सिद्धान्तान् शिवाद्वैतप्रतिपादनपरत्वेनैकीकृत्य प्रवर्तते। अत्र हि [2]शैवागमसिद्धान्तानाणवोपायत्वेन, क्रमदर्शनसिद्धान्तान् शाक्तोपायत्वेन, कुलागमसिद्धान्तांश्च शाम्भवोपायत्वेनाङ्गीकृत्यानुपायाख्यस्तुरीय उपायोऽपि वर्ण्यते। आगमदर्शनमत्रैव चूडान्तमुत्कर्षमवाप। त्रिकदर्शनानुप्राणिता एव प्रायो दृश्यन्ते साम्प्रतमुपलभ्यमाना शिवानन्दमहेश्वरानन्दप्रभृतीनां परम्पराः।

दृश्यते च भेदोऽपि कियानेतेषु शास्त्रेषु। स च बाहुल्येन वर्तते उपासा-पद्धतिष्वेव। कुल-मत-क्रम-त्रिकदर्शनानि सर्वाण्यद्वैतवादीन्येव। शास्त्राणामेतेषां वर्तते प्रभूतं वाङ्मयम्। तन्नास्माभिरत्र समालोचनीयम्। केवलं प्रासङ्गिक-

१. "सिद्धान्तशब्दश्च पङ्कजादिशब्दवद् योगरूढ्या शिवप्रणीतेषु कामिकादिषु दशाष्टा-दशसु तन्त्रेषु प्रसिद्धः" (पृ० ५) इति रत्नत्रयोल्लेखिन्यामघोरशिवाचार्यः।

२. "अभेदोपायमत्रोक्तं शाम्भवं शाक्तमुच्यते। भेदाभेदात्मकोपायं भेदोपायं तदाणवम् ॥" (१।२३०) इति तन्त्रालोकवचनमेतदनुगुणमेव। "विश्वोत्तीर्णमात्मतत्त्वमिति तान्त्रिकाः। विश्वमयमिति कुलाद्याम्नायनिविष्टाः। विश्वोत्तीर्णं विश्वमयं चेति त्रिकादिदर्शनविदः" (सू० ८ व्याख्यानम्) इति प्रत्यभिज्ञाहृदयवचनमपि समर्थयति तमेनमर्थम्।

मेवात्रोपात्तव्यम्। त्रिपुरा विद्या चतुराम्नायसाधारण्येपि दक्षिणपक्षपातिनीति विद्यानन्द (अर्थ०, पृ० ४१) ऊचे। इममर्थममृतानन्दोऽपि (यो० दी०, पृ० ११०) संमनुते। दक्षिणपक्षपातिनीति पदेन भैरवागमानुवर्तित्वमस्याः ख्याप्यते। त्रिपुरोपासनाप्रतिपादके नित्याषोडशिकार्णवे त्रिसंख्याकं पदार्थजातं प्रतिपाद्यते। संगृह्यते च तल्लघुभट्टारकेणानेनैकेन श्लोकेन—

देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरा-
स्त्रैलोक्यं त्रिपदी त्रिपुष्करमथ त्रिब्रह्म वर्णास्त्रयः।
य त्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः॥ (श्लो० ९)

व्याख्यातं चैतत्पदार्थजातं नित्याषोडशिकार्णवचतुर्थपटलीयाद्यविंशतिश्लोक-व्याख्यानेष्वन्यत्र[1] च। कौलदर्शने पिण्ड-पद-रूप-रूपातीताख्यं पदार्थचतुष्टयं व्याख्या-यते। एतदानुगुण्येन शिवानन्देन ऋजुविमर्शिन्याममृतानन्देन च योगिनी हृदय-दीपिका-सौभाग्यसुधोदयादिष्वनाख्याख्यं तुरीयं तत्त्वमङ्गीकृत्य तत्त्वचतुष्टयप्रति-पादनपरं व्याख्यातं त्रैपुरं तन्त्रम्। अर्थरत्नावल्यां विद्यानन्देन तु संकेतपद्धतिमनु-सृत्य पीठपञ्चक-वामादिपञ्चक-इच्छादिपञ्चक-अकारहकारपञ्चकादीनां हता-नाहतोत्तीर्णानां नादानाम् अनिकेत-रसत्रितयादिपदानां च व्याख्यानं क्रमदर्श-नानुगुण्येन कृतम्। त्रिपुरसुन्दरीदण्डके—"सुस्फुटं वाममार्गस्य सर्वोत्तमत्वं समुप-दिशता" इत्युक्तवता दीपकनाथसिद्धेन त्रिपुराविद्याया वाममार्गसेव्यत्वमुपदिष्टम्। एवं चैकस्यामेव त्रिपुरोपास्तौ व्याख्यातृभेदेन दृश्यते दृष्टिभेदो विधिभेदश्च। महार्थमञ्जरीकारेण स्वात्मदेवतैवोपास्यत्वेनात्राभिहिता क्रमसरणिमनुसरता। स्वात्मदेवता च—"स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा" (३५।१३) इति तन्त्रराजवचनप्रामाण्येन सेयं ललिता भगवती त्रिपुरसुन्दर्येव। अत्रैव देवतास्वरूपप्रतिपादकस्य महार्थमञ्जरोपरिमलग्रन्थस्य (पृ० ११७-१२७) विनियोगो दृश्यते। स्वात्मदेवताया अस्याः सपर्याविधिप्रदर्शनमुखेनैव सर्वोऽपि महार्थोऽत्र (पृ० ७९-११७) व्याख्यातः।

तन्त्रालोकविवेककारजयरथप्रामाण्येन क्रमदर्शनस्यैतिहासिकं परिचयं समुस्थापयद्भिः श्रीमद्भिः [2]कान्तिचन्द्रपाण्डेयमहानुभावैः शिवानन्दः क्रमदर्शनस्य

१. द्रष्टव्यम्—ऋजुविमर्शिन्यामर्थरत्नावल्यां च (पृ० ६३-६४)।

२. "अभिनवगुप्त" इत्याद्याख्यस्य ग्रन्थस्य द्वितीये संस्करणे, पृ० ४६४–४६६.

In Public domain. Digitization Muthulakshmi Research Academy

प्रथम आचार्य इत्यमन्यत। अत एव [1]सोऽवतारकनाथनाम्ना तत्र स्मर्यते। क्रमकेलिग्रन्थमुद्धरता हि जयरथेनैवमुच्यते—"यथैकः श्रीमान् वीरवरः सुगृहीतनामधेयो गोविन्दराजाभिधानः, श्रीभानुकाभिधानो द्वितीयः, श्रीमानेरकसमाख्यस्तृतीयः सममेवोपदेशं पीठेश्वरीभ्य उत्तरपीठलब्धोपदेशात् श्रीशिवानन्दनाथाल्लब्धानुग्रहाभ्यः श्रीकेयूरवती-श्रीमदनिका-श्रीकल्याणिकाभ्यः प्राप्नुवन्तः। तत्राद्यः····· स चेदं रहस्यं श्रीसोमानन्दाभिधानाय गुरवे संचारयाम्बभूव। द्वितीयोऽप्येवमेवास्त। तस्यैव चैषा श्रीमदुज्जटोड्डटादिनानागुरुपरिपाटीसन्ततिः, यत्प्रसादासादितमहिमभिरस्माभिरेतत् प्रदर्शितम्" (आ० ४, पृ० १९२) इति। जयरथेनास्मिन्नेव प्रसङ्गे ह्रस्वनाथ-नवेरकनाथ-भोजराज-[2]चक्रभानु-भूतिराज-प्रभृतय आचार्याः स्मृताः। अस्यामाचार्यपरम्परायां कल्लटशिष्यो भट्टप्रद्युम्नस्तत्त्वगर्भस्तोत्रकर्ता न दृश्यते। अत्र यद्वक्तव्यं तदस्माभिः "त्रिपुरादर्शनस्यापरिचिता आचार्याः कृतयश्च" इत्याख्ये [3]निबन्धे उक्तम्। तेनायमपि क्रमदर्शनस्यैवाचार्यः प्रतीयते। अभिनवगुप्ततः प्राचीनायामस्यां काल्युपासकाचार्यपरम्परायां स्मृतः शिवानन्दो नूनं महेश्वरानन्दपरमगुरोः शिवानन्दाद् भिन्नः। महेश्वरानन्दोऽपि नैतेषु कानपि स्मरति, देवपाणिसम्प्रदायानुप्रविष्टत्वं चात्मनः ख्यापयति (पृ० १०४), "शक्तिः शिवो देवपाणिः" (पृ० ९५) इत्यादिना च पादुकोदयवचनेन तस्यास्य सम्प्रदायस्याद्यप्रवक्तृत्वमुपपाद्यते। कोऽयं देवपाणिरिति त्वद्य न ज्ञायते, तथापि क्रमदर्शनस्यैवायमाचार्यः स्यात्। शिवानन्दो हि परमगुरुरस्य ऋजुविमर्शिन्यामन्यत्र वोपलब्धेषु ग्रन्थेषु न व्याख्याति क्रमदर्शनम्। महेश्वरानन्देन क्रमवासनापदेनोक्तायां सुभगोदयवासनायां भगवत्यास्त्रिपुरसुन्दर्या आन्तरमुपासनमेव वर्ण्यते। नह्येषु शिवानन्दग्रन्थेषु कुत्रापि दृश्यते क्रमदर्शनस्य स्वल्पोऽपि प्रभावः। अतो देवपाणिसम्प्रदायानुप्रवेशमुखेनैव क्रमसरणिरनुसृता महेश्वरानन्देनेति युक्तमुत्पश्यामः। तामिमां सरणिमनुसरताऽपि महेश्वरानन्देन स्वात्मदेवता ललितैवोपास्यत्वेनाभिहितेति महेश्वरानन्दव्याख्यातस्य क्रमदर्शनस्य वैशिष्ट्यमेतदवधेयताकोटिमाटीकते।

---

१. तन्त्रालोकविवेके, आ० ४, पृ० १९५, १९७ द्रष्टव्ये।

२. चक्रभानुरयं चिद्गगनचन्द्रिकायां ३०० तमे श्लोके स्मृतः। क्रमदर्शनस्यात्रोद्धृतानामन्येषां च ग्रन्थग्रन्थकर्तॄणां विस्तृतः परिचयोऽस्मत्सुहृदा श्रीमता डॉ० नवजीवनरस्तोगिमहोदयेन स्वकीये क्रमदर्शनसंवद्धे शोधनिबन्धेऽधुनावध्यप्रकाशिते समुपस्थापितः।

३. सारस्वती सुषमा, व० २०, अ० २, पृ० १८ द्रष्टव्यम्।

महार्थमञ्जर्यां परिमले चोन्मीलिता विशिष्टा वृक्

प्रथमगाथापरिमलोपोद्घाते सर्वासां गाथानां प्रतिपाद्या विषयाः, परिमलप्रतिपादिताश्च विषया ग्रन्थान्ते "आदिवाक्यम्" इत्यादिना (पृ० १९३) "गृह्यतां तन्त्रसंग्रहः" (पृ० १९४) इत्यन्तेन ग्रन्थेन संक्षेपेणोपन्यस्ताः। क्रम-कुल-त्रिकदर्शनानां समग्रिभूतमेतन्महार्थमञ्जर्याह्वयं महत् तन्त्रम्। अत्रोपन्यस्तान् कांश्चन विशिष्टान् सांस्कृतिकान् दार्शनिकांश्च विषयान् व्याचिख्यासयिषामः।

श्रौतस्मार्तादिशास्त्राणामवरत्वम्

श्रौतस्मार्तादिशास्त्राण्यत्र बाह्याम्नायपदेनाभिधीयन्ते (पृ० १७७)। शाङ्कराद्वैतदर्शनं च मायावेदान्त(पृ० ५०)-पाशववेदान्त (पृ० ७५)-बाह्याद्वैतसिद्धान्त-पाशवशास्त्र(पृ० १३०)प्रभृतिभिः पदैः स्मर्यते। एतच्च "वेदाच्छैवं ततो वामम्" इत्यादिपरात्रीशिकाव्याख्योद्धृतवचनेन, "सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परम्" (२।७) इत्यादिकुलार्णववचनेन च समर्थ्यते। अत एव—"श्रुतिस्मृत्यादेरप्यस्मत्तन्त्रस्य प्रामाण्योत्कर्षः" (पृ० २२) इत्येवं वदति सः, "अत्र ये सौत्रामण्यादिदृष्टान्तदृष्ट्या प्रामाण्यं प्रसाधयन्ति, नूनं ते हिंसावलोकितकेन विगलितमपि ब्राह्मण्यमालोकयन्ति" इति च कटाक्षयति वैदिकान्। वर्णाश्रमादिनैयत्यादिना परिस्फुरन् सर्वोऽपि व्यवहारः पाशप्ररोहपदेनाभिहितो (पृ० १४५) महेश्वरानन्देन। "ब्राह्मणचाण्डालादिव्यवस्थापरित्यागेन च—"घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी। कुलं जातिश्च शीलं चेत्यष्टौ पाशाः प्रकीर्तिताः॥" इत्युपपादितं पाशाष्टकं स्वत एवापहीयते" इत्यप्युक्तं तेनैव। एतच्च—

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्येऽथवा प्रिये।
सर्वे ते समधर्माणः शिवधर्मे नियोजिताः॥····
एकैव सा स्मृता जातिर्भैरवीया शिवाव्यया।
तन्त्रमेतत् समाश्रित्य प्राग्जातिं नह्युदीरयेत्॥···
प्राग्जात्युदीरणाद् देवि प्रायश्चित्ती भवेन्नरः॥····
अविवेकी भवेत् तस्माद् य इच्छेदुत्तमां गतिम्। (४।५४०-५४६)

इति स्वच्छन्दतन्त्रानुगुण्येन प्रवर्तते।

In Public domain. Digitization Muthulakshmi Research Academy

विधिनिषेधव्यवस्थापनम्

अत एव महार्थमञ्जरीकारोऽयं वैदिकान् आचारानपि समालोचयति, न तु सार्वात्म्येन ताननुसरति। तथाहि सप्तमगाथाव्याख्याने स वदति—"तत्र सन्ध्योपास्त्यादौ विधिः, कलञ्जभक्षणादौ निषेधश्चेत्युच्यते। तत्र किं तज्ज्ञानमात्रेण ते प्रवर्तन्ते निवर्तन्ते च, उत स्वेच्छानुगुण्यात्। यदि ज्ञानमात्रेण सन्ध्यानुपासकः कलञ्जभक्षको वा न कश्चिदालोक्येत। यदि तु स्वेच्छानुगुण्यात्, तदानुष्ठातॄणां रुचिमेव विधिनिषेधावनुवर्तेते इत्यर्थो भवति। ततश्च तेषां सन्ध्योपासनादावर्थे यत्र रुचिस्तत्र विधिः, यत्र वा कलञ्जभक्षणादौ न रुचिस्तत्र निषेध इत्यनया भङ्ग्या सन्ध्योपासनादावेवारुचिश्चेत् तत्र निषेधः, कलञ्जभक्षणादावेव चेद् रुचिस्तत्र च विधिरित्यर्थतत्त्वनिश्चयः स्यात्" (पृ० २१–२२) इति, प्रमाणयति च तमिमं सिद्धान्तं संवित्प्रकाशश्लोकेनानेन—

त्यागः शक्यक्रियो यस्य स हेय इति निश्चितः।
त्यक्तुं न शक्यते यच्च तदुपादेयमित्यपि॥ इति।
(पृ० २२)

ख्यातिस्वरूपम्

ख्यातिशब्दो यद्यपि सामान्येन प्रसिद्धयर्थे प्रयुज्यते, तथापि धातूनामनेकार्थत्वाद् भारतीयेषु दर्शनेषु भ्रान्तिबोधकत्वेन संकेतितः सः। जडचेतनात्मकमेतज्जगदवलोक्य जिज्ञासा समुदेति—किमेतस्य कारणमिति। जिज्ञासाया अस्याः समाधानमुखेनैव प्रवर्तन्ते सर्वाणि दर्शनानि। कारणस्य कार्यस्य च जडचेतनात्मकस्य स्वरूपप्रतिपादने वर्तते मतभेदो दार्शनिकानाम्। भारतीयेषु दर्शनेषु तमिमं मतभेदं ख्यातिशब्दः साधु व्यनक्ति। ख्यातिरियं षड्धा व्याख्यायते। विज्ञानाद्वैतवादिनो योगाचारा आत्मख्यातिवादिनः, शून्यवादिनो माध्यमिका असत्ख्यातिं संगिरन्ते, प्राभाकरा अख्यातिमाहुः, नैयायिका अन्यथाख्यातिवादिनः, ब्रह्माद्वैतवादिनः शाङ्करा अनिर्वचनीयाख्यां ख्यातिमङ्गीकुर्वन्ति, रामानुजादयो वैष्णवदार्शनिकाश्च सत्ख्यातिं साधयन्ति। तत्रात्मख्यातिर्नामात्मनो विज्ञानस्य ख्यातिर्विषयरूपेण प्रतिभासः। इदं रजतमिति विज्ञानमेव रजतरूपेणावभासते, न तत्र विषयान्तरापेक्षा। अयं घट इत्यादिषु सर्वत्र विज्ञानस्यैव विषयाकारोल्लेखसंभवेनात्रापि तथैवौचित्यादिति विज्ञानाद्वैतवादिनो बौद्धाः। असत्ख्यातिर्नामासतो रजतादेः ख्यातिः प्रतीतिरिति शून्याद्वैतवादिनो माध्यमिका बौद्धाः। अख्यातिर्नाम न ख्यातिरख्यातिरप्रतीतिः, शुक्तिरजतस्थल इदं रजत-

मित्यत्रेदमंश एव प्रत्यक्षप्रतीतिविषयः, न रजतांशः, तस्य चक्षुराद्यसंनिकर्षात्। रजतमिति तु स्मृत्याकारदर्शनमिति प्राभाकराः। अभिनवगुप्तपादा अपि तामेनामख्यातिमेवाङ्गीकुर्वन्ति। तथाहि—"यावता पूर्वेण रूपेण प्रख्यातव्यं विमर्शपर्यन्तं तावन्न प्रख्यातीत्यपूर्णख्यातिरूपाऽख्यातिरेव भ्रान्तितत्त्वम्" (ई० प्र० वि०, २।२।१३) इति। अन्यथाख्यातिर्नामान्यस्यान्यरूपेण प्रतीतिः। अन्यदेशकालगतं रजतं तद्विपरीतान्यदेशकालगतत्वेन संस्कारवशेन शुक्तिसम्प्रयुक्तेन दोषोपहतेनेन्द्रियेण शुक्त्यात्मना गृह्यत इत्यन्यथाख्यातिवादिनो नैयायिकाः। सर्वत्र संसर्गमात्रमसदेवावभासते, संसर्गिणस्तु सन्त एव। सेयं विपरीतख्यातिरुच्यते मीमांसकैः। "शुक्तिरजतवेदनेऽपि विद्यमानैव रजतत्वजातिर्विद्यमानस्यैव (?) शुक्तिकाशकलस्यानात्मभूतैवात्मतयाऽवगम्यते" इति भाट्टमीमांसकैः प्रतिपादिता विपरीतख्यातिरन्यथाख्यातितो नातीव भिन्ना सदसत्ख्यातिनाम्नाऽप्यभिधीयते। अनिर्वचनीयख्यातिर्नाम सत्त्वेनासत्त्वेन चानिर्वचनीयस्य रजतादेः ख्यातिः प्रतीतिः। शुक्तिरजतस्थले हि शुक्त्यज्ञानपरिणामभूतं सदसद्भ्यामनिर्वचनीयमपूर्वं रजतमुत्पद्यते। प्रपञ्चस्याप्यनाद्यविद्यापरिणामभूतत्वादनिर्वचनीयत्वमेवेति ब्रह्माद्वैतवादिनः शाङ्कराः। "सत्ख्यातिर्नाम ज्ञानविषयस्य सत्यत्वम्। तर्हि भ्रमत्वं कथमिति चेद् विषयव्यवहारबाधाद् भ्रमत्वम्" इति रामानुजीयाः[2]। एवं सर्वेष्वेतेषु दर्शनेषु ख्यातिवादव्याजेन कारणकार्यविषयिणी स्वीया विशिष्टा दृगुन्मील्यते।

अभिनवगुप्तपादपथानुवर्तिना महेश्वरानन्देनापि "ख्यातिमपूर्णाम्" (श्लो० ५२) इति विरूपाक्षपञ्चाशिकावचनम्, "अख्यातिर्यदि" इति प्रत्यभिज्ञाहृदयोद्धृतक्षेमराजवचनं चोद्धरताऽपूर्णताख्यातिरूपाऽख्यातिरेवाङ्गीकृता (पृ० १४-१५)। अग्रे चापूर्णताख्यातिरियमाणवमलव्यापार (पृ० २४) इत्युक्त्वा, भेदवादखण्डनावसरे (पृ० ४५-४६) अख्यातिवादः स्मृतः, निष्कलशब्दव्याख्यानावसरे च (पृ० १३९) कलाशब्दः स्वात्मापूर्णाख्यातिलक्षणस्वीयसङ्कोचपरत्वेन व्याख्यातः। एवं च प्रायो गुरुमतसंमतोऽख्यातिवाद एवाभिनवगुप्तमहेश्वरानन्दादीनां संमतः।

तान्त्रिकदर्शनस्य प्रायो गुरुमतानुवर्तित्वम्

न केवलमख्यातिवादप्रसङ्गे, अपि तु संवित्स्वरूपविषये (पृ० ७७), विश्वव्यवहारे ज्ञातृज्ञानज्ञेयरूपत्रिपुटीस्वीकारे (पृ० ७६), अन्विताभिधान-

१. शास्त्रदीपिकातर्कपादः, निर्णयसागरसंस्करणम्, सन् १९३५, पृ० ५८.
२. यतीन्द्रमतदीपिका, आनन्दाश्रमसंस्करणम्, द्वितीयावृत्तिः, सन् १९३४, पृ० १२.

In Public domain. Digitization Muthulakshmi Research Academy

वादाङ्गीकारे (पृ० ७५) च समर्थितं प्राभाकरदर्शनं महेश्वरानन्देन। महेश्वरानन्दो हि संविदेव भगवती विषयसत्त्वोपगमेनः शरणमिति गुरुमतमर्यादाभङ्गीकरोति (पृ० ७७)। इयांस्तु विशेषो यत् संविदियं तान्त्रिकैर्न केवलं प्राभाकरवज्ज्ञानपदपर्यायवाचित्वेन, अपि तु परतत्त्वप्रतिपादकत्वेन व्याख्यायते। अत एव—"संविदेव भगवती स्वान्तःस्थितं जगद् बहिः प्रकाशयतीति दर्शनरहस्यम्" (ऋ० वि०, पृ० २७) इत्येवं शिवानन्दो वदति। व्याख्याता चेयं संविद् विस्तरेण प्रत्यभिज्ञाविमर्शिनी-प्रत्यभिज्ञाविवृतिविमर्शिन्यादिष्वभिनवगुप्तप्रभृतिभिः। "प्राक्तनकुशलविपाकप्रवर्तितसंवित्सारपरामर्शाभ्यासतपःप्रभावप्रतिलब्धोन्मेषेण भट्टशङ्करनन्दनेन" (भा० २, पृ० १९९) इति, "संवित्सारमीमांसकेन भट्टश्रीनारायणेन" (भा० २, पृ० १९७) इतीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामभिनवगुप्तोक्तिदिशा प्रज्ञालङ्कारकर्तुर्भट्टशङ्करनन्दनस्य, स्तवचिन्तामणिकर्तुर्भट्टनारायणस्य च मीमांसकत्वं संवित्सारमात्राङ्गीकर्तृत्वं च ज्ञायते। काव्यप्रकाशकर्त्रा रसप्रक्रियाविवरणप्रसङ्गे मीमांसकस्य भट्टलोल्लटस्य सिद्धान्तः समुपस्थापितः। क्षेमराजेन स्पन्दनिर्णये (पृ० ३४) स्पन्दकारिकाव्याख्यातृत्वेन सूचितो भट्टलोल्लट इतोऽभिन्न एव स्यात्। एतेन कश्मीरेषु दार्शनिकानां विशेषतो मीमांसकानां तान्त्रिकाणां च विदुषां कापि विशिष्टा परम्परा सूच्यते, या हि बौद्धदार्शनिकानां प्रतिस्पर्धित्वेन विकसिता। तामेव परम्परां श्लोकवार्तिकारम्भे भट्टकुमारिल एवं स्मरति—

"प्रायेणैव हि मीमांसा लोके लोकायतीकृता" इति।

व्याख्याति च न्यायरत्नाकरकारः—"मीमांसा हि भर्तृमित्रादिभिरलोकायतैव सती लोकायतीकृता" इति। प्राभाकरसिद्धान्तः काश्मीरं तान्त्रिकं दर्शनं च तस्यामेव परम्परायां विकसितं प्रतीयते। अत्र हि नूतना कापि दृगुन्मीलिता, या हि बौद्धदार्शनिकैर्मीमांसाप्रभृतिषु दर्शनेषु समुद्भाविताम् तर्कानभिनवया भङ्ग्या समालोचयति। काश्मीरं प्रत्यभिज्ञादर्शनं हि शून्याद्वैतवादिनां विज्ञानाद्वैतवादिनामनिर्वचनीयाद्वैतवादिनामन्येषां च दार्शनिकानां सिद्धान्तान् समालोचयत् स्वातन्त्र्याद्वैतवादप्रतिष्ठापनमुखेन प्रवर्तते। तदनुपदमेव स्पष्टीभविष्यति।

अन्विताभिधानवादः

एकस्यापि भावस्य स्वव्यतिरिक्ताशेषभावात्मकत्वं स्थापयता महेश्वरानन्देनोच्यते— "एतेनाभिहितान्वयवादादन्विताभिधानवादस्यौचित्यमस्तीत्युक्तं

१. श्लोकवार्तिकम्, चौखम्बासंस्करणम्, १८९८, पृ० ४.

भवति। तत्र हि 'स्तम्भं पश्य' इत्यादौ स्तम्भशब्दार्थान्वितैव दर्शनक्रिया क्रियापदेनाभिधीयते। एवं पश्यत्यर्थान्वितश्च स्तम्भः कर्मकारकेणेत्यनन्तरोपपादितार्थानुगुण्येनान्वय इत्युपपाद्यत इति" (पृ० ७२) इति। अयं भावः—अभिहितानां स्वस्ववृत्त्या पदैरुपस्थापितानामर्थानामन्वयोऽभिहितान्वय इति वादिनां भाट्टमीमांसकानां मते हि 'घटं करोति' इत्यत्र घटवृत्तिकर्मत्वानुकूलाकृतिरित्यर्थो बोध्यते। तत्र घटशब्दस्य घटोऽर्थः, अम्प्रत्ययस्य च कर्मता। वृत्तिता तु न कस्यापीत्यपदार्थोऽपि वृत्तिता तात्पर्यवशादनयोः संसर्गविधया भासते। पदान्यन्वितानि भूत्वा पश्चाद् विशिष्टमर्थं कथयन्तीतिवादिनोऽन्विताभिधानवादिनः प्राभाकराः। एषां मते हि पदार्थो वाच्योऽभिधेय एव, न तु तात्पर्याख्यवृत्त्यन्तरबोध्यः। तथा हि—'देवदत्त, गामानय' इत्युत्तमवृद्धप्रयोगात् सास्नादिमतीं व्यक्तिं मध्यमवृद्धे संचारयति तच्चेष्टया तस्य वाक्यस्य तदर्थबोधकत्वमनुमायानन्तरं 'गां नय, अश्वमानय' इति प्रयोगे गवापसरणमश्वाहरणं च दृष्ट्वाऽन्वयव्यतिरेकाभ्यां क्रियापदार्थान्विते कारके कारकपदस्य, कारकपदार्थान्वितक्रियायां च क्रियापदस्य शक्तिं बालोऽवधारयति। ततः प्रयोगकाले तस्य प्रथमतः एवान्वितबुद्धिर्जायते। तेनाभिधेयैत्रान्वयबोधोपपत्तौ किं तात्पर्यरूपवृत्त्यन्तरेणेति तेषामाशयः। एवं चैकस्यापि भावस्य स्वव्यतिरिक्ताशेषभावात्मकत्वमन्विताभिधानवाद एव साधयितुं शक्यते। प्रकाशो हि न कदाचिद् विमर्शक्रियतां विमर्शोऽपि न प्रकाशकर्तृकतां व्यभिचरति। प्रकाशविमर्शात्मकमेव च सर्वं जगदिति।

सर्वं सर्वात्मकम्

शिवः प्रकाशस्वरूपः शक्तिश्च विमर्शरूपेति ह्यागमसिद्धान्तः। सर्वस्यापि विश्ववैचित्र्यस्य प्रकाशविमर्शान्तर्गतत्वमेव। प्रकाशरूपस्यात्मनो विमर्शशक्तिरेवानुप्राणनम्। वस्तुतः—"न शिवेन विना शक्तिर्न शक्तिरहितः शिवः" (सूतसंहिता, ४।१३।२९) इति नीत्या प्रकाशो न कदाचिद् विमर्शक्रियतां विमर्शोऽपि न प्रकाशकर्तृकतां व्यभिचरतीत्यनयोर्वास्तवं वपुरैक्यस्वभावम्। परमेश्वरस्य काचिदुन्मेषनिमेषयोगपद्यलक्षणा शक्तिरस्ति। तत्र स्वरूपोन्मेषे विश्वनिमेषः, विश्वोन्मेषे च स्वरूपनिमेष इति द्वितयमपि तुलाधृतवदुत्पद्यते। ततश्च विश्वात्मको विश्वोत्तीर्णश्च परमेश्वरः सिद्ध्यति। विश्वोन्मेषावस्थायामात्मरूपस्य केवलं तिरोधानमात्रम्, न पुनरत्यन्तोपप्लवः। ननून्मेष एव निमेषो निमेष एवोन्मेषो विश्वस्य विश्वोत्तीर्णस्य चेति महत्येषा व्याहतिरिति तु न वाच्यम्, विश्वव्यवहारे वादिनां सर्वोऽपि वचनपरम्पराप्रपञ्चो ज्ञाता ज्ञानं ज्ञेयमित्येवंरूपपुटत्रयसमाहारात्मन्यर्थतत्त्वे पर्यवस्यति। परमार्थतो वेदितैव वेद्यम्, वेद्यमेव वेदिता, वित्तिरेव

In Public domain. Digitization Muthulakshmi Research Academy

वेद्यमित्याद्यशेषस्वभावसामरस्याभ्युपगमस्य पर्यन्ततः सिद्धान्तरहस्यत्वादुन्मेष एव निमेष इत्यादिव्याहृतिदोषोद्भावनमसमञ्जसमेव। "विगर्शो हि सर्वंसह आत्मानमपि परीकरोति, परमप्यात्मीकरोति, द्वयमप्येकीकुरुते, उभयमपि न्यग्भावयति" (१।५।१३) इति हि प्रत्यभिज्ञाविमर्शिनी। सर्वंकरसवादस्वीकारे च सत्यासत्ययोर्भावाभावयोश्च युक्तिपर्यालोचनायामैकरूप्यमेव सिद्धयति। तच्च प्रदर्शितं महेश्वरानन्देन ३२-३३ गाथयोर्व्याख्यानावसरे सयुक्तिकम्। एवं चैकस्यापि भावस्य स्वव्यतिरिक्ताशेषभावात्मकत्वमिति ह्यागमसिद्धान्तः। तदुक्तं तन्त्रालोके—

"अस्यां भूमौ सुखं दुःखं बन्धो मोक्षश्चितिर्जडः।
घटकुम्भवदेकार्थाः शब्दाः" (२।१९) इति।

सर्वं सर्वात्मकमित्येष सिद्धान्तः शिवदृष्टौ सोमानन्देन प्रथमाह्निकसमाप्तौ संक्षेपेण, चतुर्थपञ्चाह्निकयोश्च विस्तरेण सर्वशिवत्वोपपादनमुखेन व्याख्यातः। "समता सर्वभावानाम्" इत्यादिभ्यां तन्त्रालोकविवेके त्रिकशास्त्रवचनत्वेनोद्धृताभ्यां महेश्वरानन्देन च स्मृताभ्यां (पृ० १६८) श्लोकाभ्यामपि स एवार्थो व्यज्यते। अत एव परिमलकारेण "अतो विश्वात्मको नाथः" इत्यारभ्य "महार्थात्मा महार्थिकमनीषिणाम्" इत्यन्तान् पादुकोदयश्लोकानुद्धरता (पृ० ११) चार्वाक-अभावब्रह्मवादि-माध्यमिक-सांख्य-शब्दब्रह्मवादि-मीमांसक-नैयायिक-सौगतप्रभृतिषु श्रौताश्रौतेषु सर्वेष्वपि सिद्धान्तेषु नात्यन्तं विसंवाद इति निष्कृष्टम्। स्वात्मपरामर्श एव परा देवतेत्युक्त्वा च—"येन येन स्वरूपेण भासते तस्य तन्मयी" इत्यादिना "सर्वेषां मोहनी स्मृता" (पृ० १०३) इत्यन्तेन ग्रन्थेन तस्यास्तत्तन्मतेषु तत्तदधिकाराधिरोहक्रमतारतम्यादन्यथाऽन्यथा व्यवहार इति निदर्शितम्। पारमार्थिकावस्थायां सर्वसामरस्ये सिद्धेऽपि व्यवहारदशायां दृष्टिभेदोऽङ्गीक्रियत एव। अत एव परिमलकारेण प्रसक्त्यानुप्रसक्त्याऽत्र वैशेषिका माध्यमिकाश्च केचन सिद्धान्ताः क्षणभङ्गवादानिर्वचनीयवादादयश्च समालोचिताः।

दर्शनान्तरसमालोचनम्

महेश्वरानन्दो हि—"अविकल्पात्मा महाप्रकाशः सामान्यम्" (पृ० ७७) इति सामान्यलक्षणं प्रतिपादयन् "अनुवृत्तिप्रत्ययनिमित्तं सामान्यम्" इति तस्य वैशेषिकं लक्षणं तत्संमतं सामान्यस्य पदार्थान्तरत्वं च खण्डयामास। एवमेव चतुष्पञ्चाश्यां गाथायां तत्परिमले च क्षणभङ्गवादं तत्प्रसङ्गेन शून्यवादं च समालोचयामास। शाङ्कराणामनिर्वचनीयतावादं माध्यमिकानां शून्यवादं च

सोऽनेकेषु स्थलेषु समालोचयत्। तथाहि द्वितीयगाथापरिमले—"स्फुटप्रकाशात्मनि प्रपञ्चोद्योते न कस्यचिन्मिथ्यात्वोपपादकादेशछलस्यावकाशः" (पृ० १०) इति प्रतिपादयन् माध्यमिकानिर्वचनीयवादमर्यादां शिथिलयाञ्चकार। एवमेवाधिकारिनिरूपणप्रसङ्गे वेदान्तोपदिष्टसाधनचतुष्टयसम्पत्त्युपात्तयोरिहामुत्रार्थफलभोगविरागित्वमुमुक्षुत्वयोरनावश्यकतां प्रतिपादयाञ्चकार। अपि च—"परमेश्वरस्य ह्ययमेवासाधारणस्वभावो यत् सर्वदा सृष्ट्यादिपञ्चकृत्यकारित्वम्। एतदनङ्गीकाराद्धि मायावेदान्तादिनिर्णीतस्यात्मनः स्वस्फुरणानोदमान्द्यलक्षणमसत्कल्पत्वमापतितम्" (पृ० ५०) इत्यत्र सूचितस्यार्थस्य स्पष्टीकरणाय "बाह्याद्वैतसिद्धान्तः पाशवशास्त्रशय्यामधिशेते" (पृ० १३०) इति निर्दिशन् "अद्वैतवादनिर्वाहो वेदान्तेष्वपि दृश्यते" इति प्रतिज्ञाय "तत्रात्मा कश्चिदुत्तीर्णः" इत्यादिना "नित्यमुक्तो निरूपितः" इत्यन्तेन ग्रन्थेन तत्सिद्धान्तं स्वीकृत्यापि "अविभ्रष्टृत्वपर्यायमकर्तृत्वं न युज्यते" इत्यादिना तत्रासंगतिप्रदर्शनपुरस्सरम्—

तस्माद्विमर्शो देवस्य स्वभावोऽस्माभिरुच्यते।
भवन्त्यस्यैव पर्यायाः शक्तिरैश्वर्यमुद्यमः॥
स्पन्दः स्वतन्त्रता स्फूर्तिर्ऊर्मिरोजः कलेत्यपि।

इत्युपसंहारयामास। अग्रे च वेदान्तसम्मतं विमर्शलक्षणं समालोच्य (पृ० १४९) "विवर्तो विचित्रेण रूपेण वर्तनं न त्वविद्यावशात्, अपि तु स्वातन्त्र्यतः" (पृ० १५०) इति क्रमकेलिप्रोक्तं विवर्तलक्षणं समुपस्थाप्य "संवित्स्वातन्त्र्यमय्या महासत्तया विश्वव्यवहारस्य निर्वचनीयत्वनैयत्यादेतद्विपर्ययात्मा तस्यानिर्वचनीयत्वपक्षोऽप्यपहस्तित एव स्यात्" इति प्रतिपादयाम्बभूव। परिमले ५३-५४ पृष्ठयोर्द्वैतवादिनामर्हतां भूतचैतन्यवादिनां शून्यवादिनां च पक्षः प्रतिक्षिप्तः, ५६-५७ पृष्ठयोः सांख्यसंमतः पुरुषोदासीनत्वपक्षः, १५० पृष्ठे च ब्रह्मपरिणामवादः समालोचितः। एवं व्यवहारदृष्ट्या निरस्य परमतवादानिमान् स्थापयामास स्वसिद्धान्तान् महेश्वरानन्दो ब्रह्मजीवजगद्विषयकान् कुलक्रमत्रिकदर्शनानुसारिणः।

प्रतिबिम्बवादसतत्त्व आभासवादः

माध्यमिकानां शून्यवाद इव योगाचाराणां विज्ञानवाद इव, शाङ्करवेदान्तिनामनिर्वचनीयतावाद इव वर्तते तान्त्रिकाणां प्रतिबिम्बवादान्वित आभासवादः स्वातन्त्र्याद्वैतवादसाधनाय प्रधानमवलम्बनम्। "विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्" (श्लो० १) इत्यादिना दक्षिणामूर्तिस्तोत्रे

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिपाद्यते स एष सिद्धान्तः। परिमलकारेण "दर्पणादिप्रकाशानां हि" (पृ० ११) इत्यादिना, "तस्य च विमर्शाख्योऽतिशयः" (पृ० २९) इत्येवम्, "प्रतिबिम्बप्रक्रिया च" (पृ० १०२) इति च सूचितः प्रतिबिम्बवादस्तन्त्रालोक-तृतीयाह्निकमाधृत्य विस्तरेण प्रतिपादितः शाम्भवोपायवर्णनपरायाः एकोनषष्ट्या गाथाया व्याख्यानावसरे (पृ० १४७–१५३)। तथाहि—लोके हि दर्पणादौ स्वच्छे वस्तुन्याभिमुख्येनोल्लसन्नाननादिः पदार्थः प्रतिफलनयुक्त्या परिस्फुरतीत्यतिप्रसिद्धोऽयमर्थः। तत्र मुखतयाऽभिमतो भावः प्रतिबिम्बनक्रियामनुभवति, आदर्शात्मकश्च तदाधारतया तत्प्रयोजको भवति। एवमेव सर्वोऽयमादर्शनाद्युपलक्षितः स्तम्भकुम्भादिर्वेद्यविलासः स्वच्छत्वोत्कर्षशालिनि स्वस्वभावाभिन्नपरमेश्वरात्मके मुकुरमण्डले तन्मयत्वमर्यादया प्रतिबिम्बनयुक्त्या परिस्फुरति। नन्वेवं प्रतिबिम्ववादेऽपि मिथ्यात्वशङ्काया अपरिहार्यत्वम्? तत्र हि स्वच्छेन दर्पणादिद्रव्येण प्रतिहता लोचनमरीचयः परावृत्य स्वमात्मानं गृह्णन्तीति प्रसिद्ध्या दर्पणे पुरुष इति प्रतीतिर्भ्रान्तिरित्यवधार्यते। दर्पणे पुरुषो नास्तीत्यौत्तरकालिकेन प्रतीत्यन्तरेण तस्य बाधादिति चेन्न, बाह्येषु दर्पणादिषु बिम्बसव्यपेक्षः प्रतिबिम्बोपलम्भः। स्वात्मरूपे पुनरेतद्वैपरीत्यम्, अशेषस्यापि विश्ववैचित्र्यस्य प्रतिबिम्बतयाऽनुभूयमानत्वात्। पारमेश्वरी हि प्रतिबिम्बभङ्गिरलौकिकत्ववादनवद्यामेव कक्ष्यामधिरोहति यदमुष्यामुपन्यस्तया नीत्या बिम्बव्यपेक्षा नोत्पद्यते। तत्संभवे हि बिम्बान्वयव्यतिरेकानुविधायिनी प्रतिबिम्बस्फुरत्तेति मिथ्यात्वशङ्काया अवकाशः स्यात्। ननु बिम्बव्यतिरिक्तः प्रतिबिम्बयोगो न क्वचिदुपपद्यत इति चेत्? सत्यम्। किं क्रियताम्। एतदेव हि पारमेश्वरं तदतिशयं स्वातन्त्र्यमुच्यते, यद्बिम्बनिरपेक्षे विश्वप्रतिबिम्बनक्षमत्वं नाम। दर्पणादिप्रकाशानां हि प्रतिबिम्बादिप्रकाशनक्षमत्वेऽपि प्रमातृप्रकाशसापेक्षत्वादस्त्युपाधित्वम्। प्रमातृप्रकाशस्य त्वनन्यमुखप्रेक्षितत्वमेवेति। तस्य हि विमर्शाख्योऽतिशयः कश्चित् स्वभावतया स्वीक्रियते। अन्यथा दर्पणादिप्रकाशवदस्य जाड्यकक्ष्यानुप्रवेशः स्यात्। अत एवात्रत्या प्रतिबिम्बप्रक्रिया स्फटिकमुकुरादिव्यतिरेकादलौकिकी काचिदङ्गीकर्तव्या। यतः स्फटिकादेः प्रतिबिम्बने प्रतिबिम्बापेक्षावश्यम्भावः। अस्यास्तु समस्तस्यापि प्रपञ्चस्य प्रतिबिम्बनं प्रति भित्तिभूतत्वादेतद्विपर्ययः।

स्वातन्त्र्यशक्तिर्भासा

एतदेव परमेश्वरस्यात्यन्तदुर्घटघटनप्रागल्भ्यलक्षणं स्वातन्त्र्यमासूत्र्यते। ईश्वरो हि परमस्वतन्त्रः। इयमेव हि तस्य स्वातन्त्र्योत्कर्षकाष्ठा, यत् स्वात्मावभासाद्वैतजीविते जगति भेदप्रभेदवैचित्र्योत्पादनप्रावीण्यम्, येनातिदुर्घटकारी परमेश्वर इत्याघोष्यते। अत एव चासौ लोकपतिर्देहाक्षभुवनादेः प्रपञ्चस्येश्वरः।

मायाव्यतिरेके भेदप्रथापारमार्थ्यस्य प्रपञ्चस्याभावः। तदभावे च तत्प्रतियोगिकस्य पारमेश्वरैश्वर्यस्यानुपपत्तिरिति न किञ्चिदप्युज्जृम्भेत। तदियं माया नाम तस्योत्कृष्टं स्वातन्त्र्यम्। तदुक्तं परमार्थसारे—

परमं यत् स्वातन्त्र्यं दुर्घटसम्पादनं महेशस्य।
देवी मायाशक्तिः स्वात्मावरणं शिवस्यैतत्॥ (श्लो० १५)

परमशिवभट्टारकस्येयं शक्तिः स्वातन्त्र्यलक्षणा महती तत्त्वानामन्योन्यप्रयोज्यप्रयोजकभावे प्रगल्भा सती पृथिव्यादिभाववर्गमिवानाश्रितशिवभट्टारकमपि क्रोडीकृत्याभिवर्धते। "चितिः स्वतन्त्रा विश्वसिद्धिहेतुः" (प्र० ह्रृ० १) इत्यादिना स एवार्थः प्रतिपाद्यते। क्रमदर्शनेषु स्वातन्त्र्यमेतद् भासानाम्ना व्याख्यायते। तदुक्तं परिमलकारेण—"भासा नाम सृष्ट्यादिकृत्याक्रान्तविश्ववैचित्र्यव्यवहारगर्भिणी सर्वोत्तीर्णा सर्वानुग्राहिणी च पारमेश्वरी चिच्छक्तिः, या तदीयं स्वातन्त्र्यं स एवेत्यध्यवसीयते। यथोक्तं श्रीपादुकोदये—

भासा च नाम प्रतिभा महती तत्त्वगर्भिणी।
स्वस्वभावशिवैकात्म्यदेशिकात्मकचिन्मयी॥
यस्यां हि भित्तिभूतायां मातृमेयात्मकं जगत्।
प्रतिबिम्बतया भाति नगरादीव दर्पणे॥
स्वातन्त्र्यरूपा सा काचिच्चिच्छक्तिः परमेष्ठिनः।
तन्मयो भगवान् देवो गुरुर्गुरुमयी च सा॥
(पृ० १०१) इति।

उक्तरूपं च तत्स्वातन्त्र्यं संवित्स्वभावतां नातिक्रामति। संविदेव च भगवती स्वान्तःस्थितं जगद् बहिराभासयति।

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्॥
(ई० प्र०, १।५।७)

इति वदन् प्रत्यभिज्ञाकारोऽपि तमेनमर्थं समर्थयति। एवं च पत्रपटभित्तितलादिषु चित्रकारसंविदिव, स्वच्छेषु मुकुरासिसलिलादिषु मुखादिप्रतिबिम्ब इव, स्वातन्त्र्यशक्तिमये चिदात्मनि विश्वमुन्मील्यते, आभासते च तद् घटपटादिरूपेण। आभासोऽयं सुरेश्वराचार्यादिप्रतिपादिताभासवत्सालोकोऽनिर्वचनीयो वा, किन्तु संविन्मय एव। विश्वमयो विश्वोत्तीर्णश्च भगवानिति ह्यागमसिद्धान्तः।

In Public domain. Digitization Muthulakshmi Research Academy

विश्वोत्तीर्णमष्टात्रिंशं तत्त्वम्

विश्वमयविश्वोत्तीर्णस्यानाश्रितादिकालाग्निरुद्रान्तषट्त्रिंशत्तत्त्वरूपविश्ववैचित्र्यसंयोजनवियोजनवैदग्ध्यशालिनः परमशिवभट्टारकस्य हि शक्तिः स्वातन्त्र्यलक्षणा तत्त्वानामन्योन्यप्रयोज्यप्रयोजकभावे प्रगल्भा भवति, पृथिव्यादिभाववर्गमिवानाश्रितादिशिवभट्टारकमपि क्रोडीकृत्य परिस्फुरति। सा च विमर्शसंरम्भमयी, विमर्शाख्यो यः संरम्भः स्वान्तःस्फुरत्क्रियाशक्तिस्फाररूपः, तेन प्रकृतेत्यर्थः। सा चिदानन्देच्छाज्ञानक्रियारूपशक्तिपञ्चकसामरस्यस्वभावेत्याख्यायते। सोऽयं स्वात्मसात्कृताशेषषट्त्रिंशत्तत्त्वकलापो महान् परमशिवभट्टारकाह्वयः प्रमाता सप्तत्रिंशतया स्वीक्रियते। तस्य तादृग्रूपतापि पर्यन्ततो विकल्पकक्ष्यामनुभवति। अविकल्पात्मना च भाव्यं विश्वोत्तरेणेत्यतोऽत्राप्यविकल्पवृत्तिरष्टात्रिंशः कश्चिदागमेषूद्घोष्यते।

परमेश्वरस्य विश्वव्यवहर्तृत्वम्

विश्वोत्तीर्णस्याविकल्पस्यास्य परमेश्वरस्य—"मत्तः स्मृतिर्ज्ञानमपोहनं च" (१५।१५) इति भगवद्गीताप्रामाण्येन, "स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान्" (१।३।७) इति प्रत्यभिज्ञाप्रामाण्येन च ज्ञानस्मृत्यपोहनशक्तित्रितयवत्त्वेन विश्वव्यवहर्तृत्वं सिद्ध्यति। परिमलकारेण त्रयोदशीगाथाव्याख्यानावसरे सूचितो विश्वस्फुरणप्रकारश्चतुःपञ्चाशीगाथापरिमले ज्ञानस्मृत्यपोहनलक्षणव्याख्यानमुखेन परिदर्शितः (पृ० १३५-१३६)। अत्र विशेषजिज्ञासुभिः श्रीभगवद्गीताव्याख्यानेषु प्रत्यभिज्ञाविमर्शिन्यादिषु च प्रकरणमेतदवलोकनीयम्। विश्वस्फुरणप्रक्रियायामुपादेयास्वेतासु शक्तिषु बोधः स्मृतिश्च विश्वमय्या स्वचिच्छक्त्या तादात्म्यं न परित्यजत इति विश्वोपसंहारप्रक्रियायां तौ वर्ज्यौ भवतः। वेद्यं वित्तितो वित्तिर्वित्त्यन्तराद् वेद्यं चान्यस्माद् वेद्याद् यथा विच्छेदमाप्नुयात् तथा सामर्थ्यवती भगवतः स्वातन्त्र्यशक्तिरेवात्रापोहनपदेनाभिधीयते। सा च विश्वस्फुरणवेलायां विश्वोपसंहारे च सममेवोपादीयते। अत एव परिमलकारेण प्रकरणमेतदेवमुपसंह्रियते—

तिसृभिः शक्तिभिराभिः शिवः कुविन्दो भवन् कुलालो वा।
अनुभवति सुखं स्मरति च बहु च विकल्पयति विश्ववैचित्र्यम्॥ इति।

विश्वोत्तरस्य विश्ववैचित्र्यस्फुरणप्रकारोऽयं परिमले (पृ० ५०-६०) विस्तरेण निरूपितस्तत एवावगन्तव्यः। स्वातन्त्र्यशक्तेः कृत्यपञ्चकप्रयोजयितृत्वं त्वत्र निरूप्यते।

स्वातन्त्र्यशक्तेः कृत्यपञ्चकप्रयोजयितृत्वम्

परमशिवभट्टारकस्य हि स्वातन्त्र्यशक्तिश्चिदानन्देच्छाज्ञानक्रियारूपशक्तिपञ्चकमहिम्ना [1]सृष्टिस्थितिसंहारतिरोधानानुग्रहरूपं सृष्टिस्थितिसंहारानाख्याभासारूपं वा कृत्यपञ्चकं प्रयोजयति। परमेश्वरो हि अहमेव सर्वमिति वैश्वात्म्यप्रथानुभूतिस्फारचमत्कारोत्तरतया शुद्धां संकोचकलङ्कशङ्काशून्यां संविदं स्वस्वातन्त्र्यस्वभावविद्यामयीमनुभवन्ननेनैव हेतुना "नर्तक आत्मा" (३।९) इति शिवसूत्रस्थित्या विश्वनाटकस्य शैलूषो नट इति व्यपदिश्यते। विश्वं च पृथिव्यादिशिवान्ततत्त्वसन्दोहात्मकं सृष्टिस्थित्याद्यवस्थापञ्चकाविनाभूतत्वा[2]दारम्भयत्नाद्यवस्थापञ्चकलक्षणस्य नाटकस्यानुकरोति। कृत्यपञ्चके च परमेश्वरस्य सृष्टिस्थितिसंहारेषु त्रिषु न क्वचिदपि वैषम्यम्। उपरितनयोः पुनर्यदा व्यामोह्यमानपशुजनापेक्षया समयभ्रंशापादनादिरूपमेतच्चित्तस्य व्याकुलीकरणम्, यदा च कारुण्योत्कर्षादेतद्दोषव्युदासेनास्य भूयः स्वरूपलाभप्रदायित्वम्, तदा तिरोधानानुग्रहश्चैति तत्कृत्यद्वयं व्यपदिश्यते। यदा पुनः पशुप्रमात्राद्यवच्छेदव्यपोहेन विश्वमेव कार्यतयाऽनुसन्धीयते, तदाऽनाख्या भासेति तत्कृत्यद्वयव्यपदेश इति।

तत्र सृष्टिर्हि नामो[3]द्योगावभासचर्वणात्मविलापननिस्तरङ्गत्वलक्षणप्रथापञ्चकसमष्टिरित्याम्नायते। सर्वेषामस्मदादीनामपि प्रमातृणामेतत्प्रथापञ्चकाविनाभावः। प्रथापञ्चकं चैतत् क्रियाज्ञानेच्छोद्योगप्रतिभास्वभावसृष्टिस्थितिसंहारानाख्याभासास्वरूपतया निष्कृष्यते। ततश्च सृष्ट्यादिपञ्चकृत्यान्तर्गतमखिलमपि विश्ववैचित्र्यमेकस्यां सृष्टावेव परिस्फुरति। स्थितिश्च सृष्टानां पदार्थानां यावत्संजिहीर्षोदयमवेयाकुल्येनावस्थानम्। संहारो नाम बहिरुद्धान्तानां भावानां पारमेश्वरे प्रकाशे पुनः प्रसूत्यौचित्येन वटधानादिनीत्या वासनात्मतयाऽवस्थानम्। अनाख्यमित्याख्याशून्यमुच्यते। आख्या च पश्यन्त्यादिस्थूलवाक्त्रयस्वभावा। भासा नाम सृष्ट्यादिकृत्याक्रान्तविश्ववैचित्र्यव्यवहारगर्भिणी सर्वोत्तीर्णा सर्वानुग्राहिणो च पारमेश्वरी चिच्छक्तिः। एतत्पञ्चकप्रणेतृत्वमेव परमेश्वरस्य तत्पारमैश्वर्यं यन्नष्टार्थचतुष्कावभासनम्, लीनमेयत्रयवासनानु-

---

१. "आभासन-रक्ति-विमर्शन-बीजावस्थापन-विलापनतस्तानि" (सू० ११) इति प्रत्यभिज्ञाहृदयसूत्रदिशा परिच्छिन्नप्रमातर्यपि पञ्चकृत्यकारित्वमभिव्यञ्यते। सूत्रार्थस्तत्रैवावलोकनीयः।

२. आरम्भ-यत्न-प्रत्याशा-नियताप्ति-फलागमाख्यमवस्थापञ्चकं दशरूपके (१।१९-२२), साहित्यदर्पणे (६।७०-७३), अग्निपुराणादिषु (३३८।२१) च निरूपितम्।

३. उद्योगादिपदानामर्थोऽत्रैव (पृ० ९७) व्याख्यातोऽवलोकनीयः।

In Public domain. Digitization Muthulakshmi Research Academy